# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा** - शास्त्री-२, सेमेस्टर-३ | **प्रश्नपत्रम्** - ८ | **गुणाः** - ७० |
| **विषयः** - पुराणेतिहासः | **कोड** - CE-2.3.6 | **समयः** - ०३-०६ |
| **दिनाङ्कः** - २.१२.२०१६ | **ग्रन्थः** - *महाभारते वनपर्वणि-नलोपाख्यानपर्व, (अ. ५२तः७९)* | |

---

**प्रथमान्वितिः ( युनिट - १ )**

**प्रश्नः १ अधस्तनेषु कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गपूर्वकं भावार्थो लेख्यः । ०८**

(१) *देवेभ्योऽहं नमस्कृत्य सर्वेभ्यः पृथिवीपते ।*
*वृणे त्वामेव भर्तारं सत्यमेतद् ब्रवीमि ते ॥*

(२) *मनसा वचसा चैव यता नाभिचराम्यहम् ।*
*तेन सत्येन विबुधाः तमेव प्रदिशन्तु मे ॥*

(३) *सा समीक्ष्य तु तान् देवान् पुण्यश्लोकं च भारत ।*
*नैषधं वरयामास भैमी धर्मेण पाण्डव ॥*

**प्रश्नः २ कस्याप्येकस्योत्तरं लिखत ०८**

*(१) स्वयंवरप्रसङ्गेनलप्राप्त्यर्थं दमयन्त्याः देवान् प्रतिप्रार्थना ।*
*(२) दमयन्त्याः पुरतः राज्ञः नलस्य हंसकृता प्रशंसा ।*

**प्रश्नः ३ टिप्पणी लिखत ।( द्वे ) ०४**

*(१) नलस्य दिव्यगुणाः ।* *(२) दमयन्त्याः अनुपमं सौन्दर्यम् ।*
*(२) दमयन्त्याः नलं प्रति अनुरागः ।* *(४) नलस्य प्रशंसकः हंसः ।*

**प्रश्नः ४ पञ्चानां लघूत्तरं लिखत । ०५**

(१) *दमयन्त्याः पितुः नाम किम् ?*
(२) *नलः कुत्र तत्त्वज्ञः आसीत् ?*
(३) *नलस्य भ्रातुः नाम किम् ?*
(४) *भगवतः शिवस्य एकस्य पार्षदस्य नाम लिखतु ?*
(५) *नलः कस्य देशस्य राजासीत् ?*
(६) *नलः कस्यां कलायां कुशलः आसीत् ?*
(७) *राज्ञः भीमस्य कति पुत्राः आसन् ?*

**द्वितीयान्वितिः ( युनिट - २ )**

**प्रश्नः ५ अधस्तनेषु द्वयोः पात्रपरिचयं लिखतु । ०८**

*(१) राजा नलः, (२) दमयन्ती, (३) पुष्करः*

**प्रश्नः ६ कस्याऽपि एकस्य उत्तरं लिखत । ०८**

*(१) नलपुष्करयोः द्यूतक्रीडाप्रसङ्गं वर्णयत ।*
*(२) दमयन्त्याः विलापं विशदं वर्णयतु ।*

**प्रश्नः ७** **टिप्पणीं लिखत ।( एकाम् )** **०२**

*(१) दमयन्त्याः स्वमातरं प्रतिकथनम् ।*

*(२) अश्वाध्यक्षपदे नियुक्तः राजा नलः ।*

**प्रश्नः ८** **लघूत्तरं लिखत ।( द्वयोः )** **०२**

*(१) नलेन दावानलात् कः रक्षितः ?*

*(२) दमयन्ती कस्य भवने सुखपूर्वकम् उवास ?*

*(३) हस्तिभिः कस्य सर्वनाशः कृतः ?*

*(४) कीदृशीं दमयन्तीं त्यक्त्वा नलः प्रस्थितवान् ?*

## तृतीयान्वितिः ( युनिट – ३ )

**प्रश्नः ९** **अधस्तनेषु कयोरपि द्वयोः ससन्दर्भप्रसङ्गपूर्वकं संस्कृते भावार्थः लेख्यः ।** **०८**

*(१)* *विदर्भान् यातुमिच्छामि दमयन्त्याः स्वयंवरम् ।*
*एकाह्ना हयतत्त्वज्ञ मन्यसे यदि बाहुक ॥*

*(२)* *सर्वः सर्वं न जानाति सर्वज्ञो नास्ति कश्चन ।*
*नैकत्र परिनिष्ठास्ति ज्ञानस्य पुरुषे क्वचित् ॥*

*(३)* *रहिता भर्तृभिश्चापि नक्रुध्यन्ति कदाचनः ।*
*प्राणांश्चारित्रकवयान् धारयन्ति वरस्त्रियः ॥*

**प्रश्नः १०** **कस्याप्येकस्योत्तरं लिखत ।** **०८**

*(१) दमयन्तीबाहुकयोः संवादं सविस्तारं प्रतिपादयत ।*

*(२) नलस्याविर्भूते विदर्भनगरे कीदृशः उत्सवः जातः ।*

**प्रश्नः ११** **टिप्पणीं लिखत ।( द्वयोः )** **०४**

*(१) ऋतुपर्णस्य नलात् अश्वविद्याज्ञानम् ।*

*(२) प्रतिकुले भाग्येऽपिगुणाश्रयिनरस्यस्थितिः ।*

*(३) नलदमयन्तीमेलनम् ।*

*(४) केशिन्या बाहुकस्य परीक्षा ।*

**प्रश्नः १२** **लघुत्तरं लिखत ।( पञ्चानाम् )** **०५**

*(१) ऋतुपर्णस्य सारथेः किं नाम ?*

*(२) सिन्धुदेशस्य अश्वाः कीदृशाः आसन् ?*

*(३) बाहुकस्य रूपेण कः आसीत् ?*

*(४) वार्ष्णेयः कस्य सारथिः आसीत् ?*

*(५) संख्याज्ञाने कः निपुणः आसीत् ?*

*(६) केशिनी कं परीक्षते ?*

*(७) नलात् अश्वविद्यां क शिक्षते ?*

=०=